# राजस्थान बोर्ड परीक्षा 2019-20
# 10वीं कक्षा
# तृतीय भाषा-संस्कृतम्
# मॉडल पेपर-अष्टम्

**समय : 3.15 घंटे** **(पूर्णांक : 80)**

**परीक्षार्थियों के लिये सामान्य निर्देश :-**

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत-माध्यमेन एव लेखनीयानि।

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

एवं विभाव्य बिलद्वारं गत्वा तम् आहूतवान्- एहि, एहि प्रियदर्शन, एहि! तच्छ्रुत्वा सर्पोऽचिन्तयत्- "य एषः माम् आह्वयति, न स स्वजातीयः। यतो नैषा सर्पवाणी। तदत्रैव दुर्गे स्थितस्तावद् वेद्मि-कोऽयमिति?" आह च- 'भोः को भवान्?' स आह- "भोः गङ्गदत्तो नाम मण्डूकाधिपतिः त्वत्सकाशे मैत्र्यर्थमभ्यागतः।" तच्छ्रुत्वा सर्प आह- "भो अश्रद्धेयमेतत् यत् तृणानां वह्निना सह संगमः।"

गङ्गदत्त आह-"भोः सत्यमेतत्। स्वभाववैरी त्वमस्माकं, परं परपरिभवात् प्राप्तोऽहं ते सकाशम्।" सर्प आह- "कथय, कस्मात्ते परिभवः?" स आह- "दायादेभ्यः"। सोऽप्याह- "क्व ते आश्रयः, कूपे, तडागे, ह्रदे वा? तत् कथय स्वाश्रयम्।" तेनोक्तम्- "पाषाणचयनिबद्धे कूपे"। सर्प आह- "अपदा वयम्। तन्नास्ति मे तत्र प्रवेशः। प्रविष्टस्य च, स्थानं नास्ति, यत्र स्थितस्तव दायादान् व्यापादयामि। तद् गम्यताम्।"

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'यो यद्वपति बीजं हि लभते तादृशं फलम्' शीर्षक पाठ से उद्धृत है। इस पाठ में वर्णित कथा मूलतः पंचतन्त्र से संकलित है। इसमें गंगदत्त नामक मेंढक द्वारा अपने आत्मीय जनों से बदला लेने की भावना से उनका विनाश कराने के लिए प्रियदर्शन सर्प को लाये जाने का वर्णन हुआ है।

**हिन्दी-अनुवाद-** इस प्रकार विचार कर बिल के दरवाजे पर जाकर उस सर्प को पुकारा- "आओ, आओ प्रियदर्शन, आओ।" उसे सुनकर सर्प ने विचार किया- जो यह मुझे पुकार रहा है, वह अपनी जाति का नहीं है। क्योंकि यह सर्प की आवाज नहीं है। तो यहीं दुर्ग के भीतर विद्यमान रहते हुए उसका पता चलाता हूँ "यह कौन होगा?" तथा इस प्रकार कहा- "अरे! आप कौन हैं?" उसने कहा- "मैं गंगदत्त नाम वाला मेंढकों का राजा हूँ, तुम्हारे पास में मित्रता के लिए आया हूँ।" उसे सुनकर सर्प ने कहा- "अरे, यह विश्वास के योग्य नहीं है कि तिनकों (घास) का अग्नि के साथ मेल हो।" गंगदत्त ने कहा- "हाँ, यह तो सत्य है। स्वभाव से तुम हमारे शत्रु हो परन्तु तिरस्कार के कारण तुम्हारे पास आया हूँ।" सर्प ने कहा- कहो, किससे तुम्हारा तिरस्कार हुआ है? उसने कहा- "अपने कुटुम्बियों से।" उसने भी कहा- "तुम्हारा आश्रय (निवास स्थान) कहाँ है- कुएँ में, तालाब में अथवा झील में? अपना निवास स्थान बतलाओ।" उसने कहा-"पत्थरों के समूह से बने हुए कुएँ में।" सर्प ने कहा- "अरे! हम तो बिना पैरों वाले हैं। वहाँ मेरा प्रवेश संभव नहीं है। यदि प्रवेश भी हो गया तो स्थान नहीं है, जहाँ स्थित होकर तुम्हारे कुटुम्बियों को मार सकूँ। इसलिए जाइए।"

**अथवा**

**1.** अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

यानि अनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि। यानि अस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। श्रद्धया देयम्। अश्रद्धयादेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्।

**उत्तरम् :**

**प्रसंग-** प्रस्तुत गद्यांश हमारी पाठ्य-पुस्तक 'स्पन्दना' के 'आचार्योपदेशः' शीर्षक पाठ से उद्धृत है। मूलतः यह पाठ 'तैत्तिरीयोपनिषद्' की शिक्षा-वल्ली से संकलित है। इस पाठ में प्राचीन कालीन गुरुकुल प्रणाली में विद्या-समाप्ति के बाद छात्र के समावर्तन संस्कार (दीक्षान्त-समारोह) के अवसर पर आचार्य द्वारा शिष्य को दिये जाने वाले उपदेश का वर्णन है।

**हिन्दी-अनुवाद-** (गुरु शिष्य को उपदेश देते हैं कि) जो भी प्रशंसनीय कर्म हैं, उन्हीं का सेवन करना चाहिए, अन्य (निन्दित कर्म) का नहीं। जो हमारे श्रेष्ठ आचरण हैं, उनको ही तुम्हारे द्वारा अपनाना चाहिए, अन्य को नहीं। श्रद्धापूर्वक (दान) देना चाहिए। अश्रद्धा से कभी नहीं देना चाहिए। ऐश्वर्य के अनुसार देना चाहिए। लज्जापूर्वक देना चाहिए। पारलौकिक-भय से देना चाहिए। मित्रादि कार्य मानकर देना चाहिए। यही आदेश है। यही उपदेश है। यही वेदों का रहस्य (सार) है। यही ईश्वर वचन अर्थात् अनुशासन है। इसी प्रकार उपासना करनी चाहिए।

**2.** अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु- 5

गहनारण्ये घनान्धकारे
बन्धुजना ये स्थिता गह्वरे।

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

तत्र मया सञ्चरणीयम्
लोकहितं मम करणीयम्।।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत पद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'लोकहितं मम करणीयम्' शीर्षक पाठ से लिया गया है। इस पद्य में दीन–दुःखी एवं विपत्तिग्रस्त लोगों की सहायता करते हुए सदैव लोक–कल्याण में तत्पर रहने की प्रेरणा दी गई है।

**हिन्दी–अनुवाद–** कवि कहता है कि जो बन्धु–लोग गहन वन में, घनघोर अन्धकार में तथा गर्त में स्थित हैं, वहाँ मुझे चलना चाहिए, अर्थात् विपत्तिग्रस्त लोगों की हमें सहायता करनी चाहिए। मुझे सदैव लोक–कल्याण करना चाहिए।

**अथवा**

2. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु– 5

मुनिजनदेवैरनिशं पूज्यां जलधितरङ्गैरञ्चितसीमाम्।
भगवल्लीला–धाममयीं तां नानातीर्थैरभिरमणीयाम्।।

**उत्तरम् :**

**प्रसंग–** प्रस्तुत पद्यांश हमारी पाठ्य–पुस्तक 'स्पन्दना' के 'भारत–वैभवम्' शीर्षक पाठ से उद्धृत है। मूलतः यह पाठ श्रीजी महाराज द्वारा रचित 'भारत–भारती–वैभवम्' नामक ग्रन्थ से संकलित है। इस पद्यांश में कवि भारत–भूमि की विभिन्न विशेषताओं का वर्णन करते हुए कहता है कि–

**हिन्दी–अनुवाद–** मुनिजनों और देवताओं के द्वारा निरन्तर पूजनीय, समुद्र की लहरों से सुशोभित सीमा वाली, भगवान् की लीलाओं का निवास–स्थान तथा विभिन्न तीर्थ–स्थानों से शोभायमान् उस (भारतभूमि की मैं निरन्तर वन्दना करता हूँ)।

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 4

खलः सर्षपमात्राणि परच्छिद्राणि पश्यति।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति।।

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतश्लोकः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'सुभाषित–रत्नानि' इतिशीर्षकपाठाद् उद्धृतः। अस्मिन् श्लोके दुर्जनस्य स्वभावं परछिद्रान्वेषता च वर्णिता।

**संस्कृत–व्याख्या–** प्रस्तुतश्लोके दुर्जनस्य परछिद्रान्वेषणताविषये वर्णयन् कथितं यत् दुर्जनः सर्षपसदृशानि अतिलघूनि अपि परेषां दोषान् अवलोकयति, किन्तु स्वस्य बिल्वसदृशानि स्थूलानि छिद्राणि (दोषान्) अवलोकयन् अपि नावलोकयति अर्थात् खलः केवलं परदोषान् पश्यति स्वस्य दोषान् तु दृष्ट्वाऽपि न पश्यति।

**विशेषः–** प्रस्तुतश्लोके दुर्जनस्य स्वभावस्य यथार्थं वर्णनं कृतम्। सः स्वस्य बहुदोषान् तु न पश्यति, अपितु परेषाम् अल्पदोषमपि पश्यति।

**अथवा**

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 4

राष्ट्रदृष्टिं नमस्यामो राष्ट्रमङ्गलकारिणीम्।
यया विना न पश्यन्ति राष्ट्रं स्वनिकटस्थितम्।।

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतपद्यम् अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वराष्ट्र–गौरवम्' इतिशीर्षकपाठाद् उद्धृतम्। अस्मिन् पद्ये राष्ट्रस्य मंगलकारिणीं राष्ट्रदृष्टिं नमस्कुर्वन् कविः तस्य महत्त्वविषये कथयति यत्–

**संस्कृत–व्याख्या–** या दृष्टिः राष्ट्रस्य (देशस्य) मङ्गलं करोति वां राष्ट्रीयां दृष्टिं वयं नमस्कुर्मः। यया राष्ट्रदृष्ट्या विना जनाः स्वसमीपे स्थितं स्वराष्ट्रं न अवलोकयन्ति। अर्थात् सर्वेजनाः राष्ट्रभावनया राष्ट्रस्य कल्याणकारी कार्यं कुर्युः।

**विशेषः–** सर्वेषु जनेषु स्वराष्ट्रं प्रति श्रद्धा भावना स्यादिति पद्येऽस्मिन् कामना कृता। राष्ट्रकल्याणस्य भावनया एव सर्वेषां कल्याणं भवति।

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3

**बालः** – जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये।

**प्रथमा** – अविनीत, किं नोऽपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि? हन्त, वर्धते ते संरम्भः। स्थाने खलु ऋषिजनेन सर्वदमन इति कृतनामधेयोऽसि।

**द्वितीया** – एषा खलु केसरिणी त्वां लङ्घयिष्यति यदि तस्याः पुत्रकं नं मुञ्चसि।

**बालः** – (सस्मितम्) अहो, बलीयः खलु भीतोऽस्मि! (इत्यधरं दर्शयति)

**प्रथमा** – वत्स एनं बालमृगेन्द्रं मुञ्च। अपरं ते क्रीडनकं दास्यामि।

**बालः** – कुत्र? देह्येतत्। (इति हस्तं प्रसारयति)

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'जृम्भस्व सिंह! दन्तांस्ते गणयिष्ये' इतिशीर्षकपाठाद् उद्धृतः। मूलतः पाठोऽयम् 'अभिज्ञानशाकुन्तलस्य' सप्तमांकात् संकलितः। अंशेऽस्मिन् बालकस्य सर्वदमनस्य सिंह–शिशुना सह क्रीडायाः तपस्विनीभ्यां सह च वार्तालापस्य वर्णनं वर्तते–

**संस्कृत–व्याख्या–**

**बालकः** – मुखम् उद्घाटय सिंह! तव दन्तानां गणनां करिष्यामि।

**प्रथमा तापसी** – चञ्चलः! कथम् अस्माकं सन्तानतुल्यानि प्राणिनः तुदसि? ओह, तव क्रोधः वर्धते। मुनिजनेन तव 'सर्वदमन' इति नामकरणम् उचितमेव कृतम्।

**द्वितीया तापसी** – निश्चयेन इयम् सिंही भवन्तम् आक्रमणं करिष्यति चेत् तस्याः शिशुं न त्यजसि।

**बालकः** – (मन्दहासपूर्वकम्) अहो, अहम् तु अत्यधिकं भययुक्तमस्मि। (इति कथयित्वा अधरोष्ठं दर्शयति)

**प्रथमा तापसी** – पुत्र! इयं सिंहशिशुं त्यज। तुभ्यम् अन्यं क्रीडनकं प्रदास्यामि।

**बालकः** – कुत्रास्ति? तत् क्रीडनकं ददातु। (इति कथयित्वा हस्तं प्रसारयति)

**विशेषः–** अत्र बालस्वभावस्य, चञ्चलतायाः, बालक्रीडायाश्च स्वाभाविकं यथार्थञ्च वर्णनं वर्तते।

**अथवा**

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु– 3

**प्रतापः** – (साश्चर्यम्) किम् इदं भवान् करोति? भवदीया सम्पत्तिः कथं मदीया? किम् एतेन न मे अपमानः? न अहं दत्तां सम्पत्तिं पुनराददामि।

**भामाशाहः** – (सविनयम्) महाराज! न अहम् अपमानं करोमि। का तुच्छ–सेवके शक्तिः यया असौ तथा दुःसाहसं कुर्यात्। गृह्यतां महाराज! गृह्यताम्। देश–धर्मयोः रक्षा विधीयताम्!

**प्रतापः** – (सहर्षम् आदाय) धन्यः असि मन्त्रिवर्य! धन्यः। त्वदीया जननी धन्या। कथ्यतां तु अभिन्नहृदय! अस्यां कियती सम्पत्तिः?

**उत्तरम् :**

**प्रसङ्गः–** प्रस्तुतनाट्यांशः अस्माकं पाठ्यपुस्तकस्य 'स्पन्दनायाः' 'स्वदेशं कथं रक्षेयम्' इति शीर्षकपाठाद् उद्धृतः। पाठोऽयं डॉ. नारायणशास्त्री–

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

कांकरेण विरचितमस्ति। अस्मिन् नाट्यांशे महाराणा प्रताप-भामाशाहयोः वार्तालापं वर्तते। युद्धकाले भामाशाहः स्वदेशरक्षायै प्रतापस्य सहायतायै च स्वसम्पूर्णधनराशिं प्रतापाय समर्पयतीति वर्णितम्।

**संस्कृत-व्याख्या-**

**प्रतापः** - (यदा भामाशाहः धनराशिग्रन्थं प्रतापस्य चरणयोः अर्पयति, तदा आश्चर्यपूर्वकम्) भवान् एतद् किं करोति? इयं सम्पत्तिः भवतः वर्तते, तर्हि मम कथं भवितुमर्हति? इत्थं कथयित्वा तु भवान् ममापमानं करोति। पुनश्चाहं प्रदत्तां धनराशिं न स्वीकरोमि।

**भामाशाहः** - (विनम्रतापूर्वकम्) हे महाराज! अहं भवतः अपमानं (तिरस्कारं) न करोमि। अहं तु भवताम् अल्पसेवकोऽस्मि, नास्ति मम सा शक्तिः यया भवतामपमानरूपं दुःसाहसं कर्तुं शक्नोमि। हे महाराज! इमां धनराशिं गृह्यताम्, स्वीक्रियताम्। देशस्य धर्मस्य च रक्षां क्रियताम्।

**प्रतापः** - (हर्षपूर्वकम् गृहीत्वा) धन्योऽसि मन्त्रिश्रेष्ठ! धन्योऽसि! भवतः माता धन्या वर्तते। कथयतु प्रियमित्रम्! अस्यां ग्रन्थिकायां कियती धनराशिः वर्तते?

**5.** अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु- 3

1. सूरजमल्लस्य जन्म कदा अभवत्?
2. भारतस्य उत्तरस्यां दिशि किं स्थितम् अस्ति?
3. प्रतापस्य जन्म कदा अभवत्?
4. भारत वसुधा किं किं ददाति?
5. पृथिव्यां कियन्ति रत्नानि? कानि च तानि?
6. मरुमरीचिकां स्पष्टी कुर्वन्तु।
7. पञ्चतन्त्रस्य कति तन्त्राणि तेषां नामानि लिखत।
8. धर्मात् किं न करणीयम्?

**उत्तरम् :**

1. सूरजमल्लस्य जन्म वसन्तपञ्चम्याम् (13 माघः दिने) 1707 तमे ईस्वीयवर्षे अभवत्।
2. भारतस्य उत्तरस्यां दिशि हिमालयः (हिमाद्रिः) स्थित अस्ति।
3. प्रतापस्य जन्म विक्रमस्य 1597 तमे वर्षे (1540 ई.) ज्येष्ठ शुक्लतृतीयायाम् अभवत्।
4. भारतवसुधा शान्तिं, लक्ष्मी सुखं च ददाति।
5. पृथिव्यां त्रीणि रत्नानि सन्ति-
   (क) जलम्, (ख) अन्नम्, (ग) सुभाषितं च।
6. बालुकायाः तरंगिताः स्तूपाः जलम् इव प्रतिभान्ति अतः मृगाः पिपासुः जलाशयं मत्वा दूरं दूरं धावति नश्यति च।
7. पञ्चतन्त्रस्य पञ्चतन्त्राणि सन्ति, तेषां नामानि-
   (क) मित्रभेदः (ख) मित्रसम्प्राप्तिः
   (ग) काकोलूकीयम् (घ) लब्धप्रणाशः
   (ङ) अपरीक्षितकारकम् च इति।
8. धर्मात् न प्रमदितव्यम्।

**निर्देशः प्रश्न संख्या 6-9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु-**

**6.** देश-धर्मयोः रक्षां विधीयताम्। 1

**उत्तरम् :**

कस्य रक्षां विधीयताम्?

**7.** अहर्निशं जागरणीयम्। 1

**उत्तरम् :**

कदा जागरणीय?

**8.** तुन्दिलाः स्वादुरसा कलिङ्गा। 1

**उत्तरम् :**

तुन्दिलाः स्वादुरसा के?

**9.** अहिंसायाः धर्मः प्रवर्तते। 1

**उत्तरम् :**

कुतः धर्मः प्रवर्तते?

**10.** प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु। 3

**उत्तरम् :**

1. समानसंस्कृतिमतां यावती पितृ-पुण्यभूः।
   तावतीं भुवमावृत्य राष्ट्रमेकं निगद्यते।।
2. गुणैः गौरवमायाति नोच्चैः आसनमास्थितः।
   प्रासादशिखरस्थोऽपि काको न गरुडायते।।

**11.** अधोलिखितं गद्यांशं पठित्वा एतादाधारितप्रश्नानाम् उत्तराणि यथानिर्देशं लिखतु-

सताम् आचारः सदाचारः इति कथ्यते। सज्जनाः यथा आचरन्ति तथैव आचरणं सदाचारो भवति। ते सर्वैः सह शिष्टतापूर्वकं व्यवहारं कुर्वन्ति। तेषु सत्याचरणं, वाक्संयमः, विनयः, अक्रोधः, क्षमा, धर्माचरणमित्यादयः सद्गुणाः दृश्यन्ते। सदाचारस्य सत्तयैव संसारे जनः उन्नतिं करोति। देशस्य, राष्ट्रस्य समाजस्य, जनस्य च उन्नत्यै सदाचारस्य महती आवश्यकता वर्तते। सदाचारेणैव जनाः ब्रह्मचारिणो भवन्ति। सदाचारेणैव शरीरं परिपुष्टं भवति। सदाचारेण बुद्धिः वर्धते। सदाचारेणैव मनुष्यः सत्यभाषणम् अन्यच्च सत्कर्म कर्तुं प्रवृत्तो भवति। अतएव पूर्वैः महर्षिभिः 'आचारः परमो धर्मः' इत्युक्तम्।

संसारे सर्वत्र सदाचारस्यैव महत्त्वं दृश्यते। ये सदाचारिणो भवन्ति, ते एव सर्वत्र आदरं लभन्ते। वेदरामायणमहाभारतेष्वपि सदाचारस्य महिमा वर्णिता वर्तते। सदाचाराभावेनैव चतुर्वेदविदपि रावणो राक्षस इति कथ्यते। अतः सर्वैः जनैः स्वोन्नत्यै सदा सदाचारः पालनीयः।

1. अस्य गद्यांशस्य उपयुक्तं शीर्षकं लिखत। 1
2. यथानिर्देशं प्रश्नान् उत्तरतु-
   (क) केषाम् आचारः सदाचारः इति कथ्यते? 1
   (ख) केन बुद्धिः वर्धते? 1
   (ग) कया संसारे जनः उन्नतिं करोति? 1
   (घ) महर्षिभिः आचारः कीदृशो धर्मः कथितः? 1
   (ङ) सर्वैः जनैः स्वोन्नत्यै सदा कः पालनीयः? 1
3. यथानिर्देशं प्रश्नान् उत्तरतु-
   (क) "सदाचारेणैव शरीरं परिपुष्टं भवति" इत्यस्मिन् वाक्ये कर्तृपदं किमस्ति? 1
   (ख) 'सर्वैः जनैः' इत्यनयोः पदयोः विशेषणपदं किम्? 1
   (ग) 'क्रोधः' इत्यस्य किं विलोमपदमत्र प्रयुक्तम्? 1
   (घ) "ते एव सर्वत्र आदरं ...........।" अत्र पूरणीयं समुचितं क्रियापदं किम्? 1

**उत्तरम् :**

1. सदाचारस्य महत्त्वम्।
2. (क) सताम्।
   (ख) सदाचारेण।
   (ग) सदाचारस्य सत्तयैव संसारे जनः उन्नतिं करोति।
   (घ) महर्षिभिः आचारः परमो धर्मः कथितः।
   (ङ) सर्वैः जनैः स्वोन्नत्यै सदा सदाचारः पालनीयः।
3. (क) शरीरम्।
   (ख) सर्वैः।

सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

(ग) अक्रोधः।

(घ) लभन्ते।

**12.** अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखतु।

1. यद्यपि। 1
2. जगदीशः। 1

**उत्तरम् :**

1. यदि + अपि (यण् सन्धि)
2. जगत् + ईशः (जश्त्व सन्धि)

**13.** अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखतु।

1. बालः + अपि 1
2. पौ + अकः 1

**उत्तरम् :**

1. बालोऽपि (उत्वं विसर्ग सन्धि)।
2. पावकः (अयादि सन्धि)।

**14.** अधोलिखितवाक्येषु रेखांकितसमस्तपदानां विग्रहं अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत–

1. महान् जनः येन गतः सः पन्थाः। 1
2. गुरोः समीपम् स्थित्वा जनकः ज्ञानं प्राप्तवान्। 1
3. कौ पूज्यौ? मातापितरौ। 1

**उत्तरम् :**

1. महाजनः, कर्मधारय समासः।
2. उपगुरौ, अव्ययीभाव समासः।
3. माता च पिता च, द्वन्द्व समासः।

**15.** निम्नलिखितवाक्येषु रेखांकितपदेषु प्रयुक्तविभक्तिं तत् कारणं च लिखत–

1. कृषकः क्षेत्रं प्रति गच्छति। 1
2. आचार्यः शिष्याय क्रुध्यति। 1
3. कन्या भिक्षुकाय भोजनं ददाति। 1

**उत्तरम् :**

1. द्वितीया विभक्तिः, 'प्रति' योगे।
2. चतुर्थी विभक्तिः, 'क्रुध्' धातुयोगे।
3. चतुर्थी विभक्तिः 'दा' धातुयोगे।

**16.** कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।

1. प्लेटो महान् (बुद्धि + मतुप्) .......... आसीत्। 1
2. भारतस्य (पवित्र + टाप्) .......... नदी गंगा अस्ति। 1

**उत्तरम् :**

1. बुद्धिमान्
2. पवित्रा

**17.** अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

1. काव्यस्य मधुरत्वम् कवयः एव जानन्ति। 1
2. नाहम् बाला इति। 1

**उत्तरम् :**

1. मधुर + त्व
2. बाल + टाप्

**18.** मंजूषायां प्रदत्तैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु–

| मा, श्वः, खलु, विना |
|---|

1. बालकाः .......... प्रदर्शिनीं द्रक्ष्यन्ति। 1
2. धनं .......... बलं न लोके। 1
3. क्रोधं .......... कुरु। 1

**उत्तरम् :**

1. बालकाः श्वः प्रदर्शिनीं द्रक्ष्यन्ति।
2. धनं विना बलं न लोके।
3. क्रोधं मा कुरु।

**निर्देशः– प्रश्न संख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु–**

**19.** अहं जलं पिबामि। 1

**उत्तरम् :**

मया जलं पीयते।

**20.** मेघैः जलं वृष्यते। 1

**उत्तरम् :**

मेघाः जलं वर्षन्ति।

**21.** सा हसति। 1

**उत्तरम् :**

तया हस्यते।

**22.** घटिकाचित्रं सहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु–







1. अहं प्रातः .......... उत्तिष्ठामि। 1
2. अविनाशः .......... अल्पाहारं करोति। 1

**उत्तरम् :**

1. अहं प्रातः पंचवादने उत्तिष्ठामि।
2. अविनाशः सार्धसप्तवादने अल्पाहारं करोति।

**23.** अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु–

1. चत्वारः फलानि सन्ति। 1
2. सर्वे जनाः स्वकार्यं करोतु। 1
3. पुत्राः पितरं सेवन्ति। 1

**उत्तरम् :**

1. चत्वारि फलानि सन्ति।
2. सर्वे जनाः स्वकार्यं कुर्वन्तु।
3. पुत्राः पितरं सेवन्ते।

**24.** भवती किरणः। भवती छात्रावासे पठति। भवत्याः अनुजः रमेशः नवमकक्षायां संस्कृतं पठितुं न इच्छति। तं प्रेरयितुम् लिखितं पत्र। 4

**उत्तरम् :**

गङ्गाछात्रावासः
ग्रामोदयविद्यालयः
अजमेरः
दिनांकः– 20.03.20....

प्रिय अनुज रमेश!

शुभाशिषः।

भवान् अष्टं कक्षायां नवतिप्रतिशतम् अंकान् प्राप्य उत्तीर्णः जातः इति भवतः पत्रात् ज्ञात्वा अहम् अतीव प्रसन्ना अस्मि। शतशः वर्धापनानि। मया इदम् अपि ज्ञातं यत् भवान् नवम्यां कक्षायां संस्कृतविषयं स्वीकर्तुं न इच्छति। प्रिय वत्स! संस्कृतभाषायाः ज्ञानं विना अस्माकं जीवनम्

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रूप से मॉडल पेपर भेजे जाएंगे।

एव अपूर्णं भवति। अस्माकं संस्कृतसाहित्यं तु सम्पूर्णविश्वाय प्रेरणाप्रदम् अस्ति। तत्कथं भवान् तस्मात् अपूर्व-ज्ञानात् वञ्चितः भवितुम् इच्छति। मम तु ज्ञानचक्षुः एव अनेन उन्मीलितं जातम्। आशासे यद् भवान् नवमकक्षातः एव स्वज्ञानवर्धनं कृत्वा अन्यान् अपि प्रेरयिष्यति। मातृपितृचरणयोः मे प्रणामाः निवेद्यन्ताम् इति।

भवतः अग्रजा
किरणः

**अथवा**

**24.** भवती कनकग्रामवासिनी रेखा स्वकीयां सखीम् अंकितां प्रति 'संस्कृतभाषा शिक्षणम्' इति विषये अधोलिखितं पत्रं मञ्जूषा पद सहायता पूरयित्वा लिखत। 4

**मञ्जूषा**– कनकग्रामतः, अस्माकम्, इच्छति, रेखा, पृथक्, पठित्वा, प्राप्तम्, सुगन्धम्

................
दिनांकः– 18.03.20....

प्रिये अंकिते!
नमस्ते।

भवत्या पत्रं ............। भवती संस्कृतभाषां पठितुम् ......... एषा भाषा वैज्ञानिकी। संस्कृतम् .......... देशस्य प्रसिद्धा भाषा। भारतीयसंस्कृतेः संस्कृतं ........... कर्तुं तथैव न शक्यते यथा पुष्पेभ्यः ...........। अतः भवती अपि संस्कृतं पठतु एवं च .......... प्रचारं करोतु।

भवत्याः प्रिय सखी
..............

**उत्तरम् :**

कनकग्रामतः
दिनांकः– 18.03.20....

प्रिये अंकिते!
नमस्ते।

भवत्या पत्रं प्राप्तम्। भवती संस्कृतभाषां पठितुम् इच्छति एषा भाषा वैज्ञानिकी। संस्कृतम् अस्माकं देशस्य प्रसिद्धा भाषा। भारतीयसंस्कृतेः संस्कृतं पृथक् कर्तुं तथैव न शक्यते यथा पुष्पेभ्यः सुगन्धम्। अतः भवती अपि संस्कृतं पठतु एवं च पठित्वा प्रचारं करोतु।

भवत्याः प्रिय सखी
रेखा।

**25.** मंजूषायाः उपयुक्तपदानि गृहीत्वा 'जयपुर भ्रमणम्' इति विषये मित्रयोः परस्पर संवादं पूरयतु। 4

**मञ्जूषा**– मित्रैः, जयपुरं, कार्यक्रमः, दर्शनीयम्, यात्रानुभवविषये, द्रक्ष्यामः

**विनोदः** – अंकित! श्वः भवान् कुत्र गमिष्यति?
**अंकितः** – अहं ........... गमिष्यामि।
**विनोदः** – तत्र किमपि कार्यं वर्तते? अथवा भ्रमणार्थम् एव गच्छति?
**अंकितः** – कार्यं नास्ति, अहं तु ............ सह भ्रमणार्थं गच्छामि।
**विनोदः** – जयपुरे कुत्र-कुत्र भ्रमणस्य .......... अस्ति?
**अंकितः** – वयं तत्र आमेर-दुर्गं, जयगढ़दुर्गं, गोविन्ददेव-मन्दिरं च ...........।
**विनोदः** – तत्र नाहरगढ़-दुर्गमपि पश्यतु। तदपि ............ अस्ति।
**अंकितः** – यदि समयः अवशिष्टः भविष्यति तर्हि निश्चयेन तत्र गमिष्यामः।
**विनोदः** – बाढ़ं मित्र! नमस्ते! इदानीम् अहं गच्छामि। सोमवासरे आवां पुनः मिलिष्यावः। तदा ............ वार्तालापं करिष्यावः।

**उत्तरम् :**

**विनोदः** – अंकित! श्वः भवान् कुत्र गमिष्यति?
**अंकितः** – अहं जयपुरं गमिष्यामि।
**विनोदः** – तत्र किमपि कार्यं वर्तते? अथवा भ्रमणार्थम् एव गच्छति?
**अंकितः** – कार्यं नास्ति, अहं तु मित्रैः सह भ्रमणार्थं गच्छामि।
**विनोदः** – जयपुरे कुत्र-कुत्र भ्रमणस्य कार्यक्रमः अस्ति?
**अंकितः** – वयं तत्र आमेर-दुर्गं, जयगढ़दुर्गं, गोविन्ददेव-मन्दिरं च द्रक्ष्यामः।
**विनोदः** – तत्र नाहरगढ़-दुर्गमपि पश्यतु। तदपि दर्शनीयम् अस्ति।
**अंकितः** – यदि समयः अवशिष्टः भविष्यति तर्हि निश्चयेन तत्र गमिष्यामः।
**विनोदः** – बाढ़ं मित्र! नमस्ते! इदानीम् अहं गच्छामि। सोमवासरे आवां पुनः मिलिष्यावः। तदा यात्रानुभवविषये वार्तालापं करिष्यावः।

**26.** अधोलिखितषड्वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु– 4

1. अनुशासन से देश महान बनता है।
2. राजा ब्राह्मण को गाय देता है।
3. पेड़ से पत्ते गिरते हैं।
4. गंगा नदियों में सबसे पवित्र है।
5. हिमालय पर्वतों का राजा है।
6. संस्कृत सभी भाषाओं की जननी है।

**उत्तरम् :**

1. अनुशानेन देशः महीयते।
2. राजा ब्राह्मणाय गां ददाति।
3. वृक्षात् पत्राणि पतन्ति।
4. नदीषु गंगा शुचितमा।
5. हिमालयः पर्वतानां राजा अस्ति।
6. संस्कृतं सर्वासां भाषाणां जननी अस्ति।

**27.** अधः चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया षड्वाक्यानि रचयतु– 3

**मञ्जूषा**– क्षालयन्ति, मलिनं, विषाक्तानि, प्रदूषिता, जलम्, अवकरम्।



सभी विद्यार्थियों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर/डेस्क वर्क प्राप्त करने के लिए 9460377092 को अपनी क्लास के व्हाट्सएप्प ग्रुप में एड करें। आपकी क्लास के व्हाट्सएप्प ग्रुप में पेपर भेज दिए जाएंगे।

**उत्तरम् :**

**वाक्यानि–**

1. अस्मिन् चित्रे प्रदूषिता नदी दृश्यते।
2. चित्रे तिस्रः महिलाः वस्त्राणि क्षालयन्ति।
3. चित्रे कोऽपि वाहनात् नद्याम् अवकरं क्षिपति।
4. जले विषाक्तानि वस्तूनि विलीयन्ते।
5. नद्याः जलं मलिनम् अस्ति।
6. उद्योगानां अपशिष्टैः जलं दूषितं भवति।

**अथवा**

**27.** अधोलिखितम् अनुच्छेदं मञ्जूषायाः सहायतया पूरयित्वा लिखतु– 3

| |
|---|
| **मञ्जूषा–** गंगा, पर्वतानां, प्रहरी, मुनयः, औषधयः, उच्चतमः |

हिमालयः .......... राजा अस्ति। हिमालयात् .......... प्रभवति। अस्य शिखराणि हिमाच्छादितानि सन्ति। हिमालये .......... तपं कुर्वन्ति। हिमालयः भारतस्य .......... अस्ति। पर्वतेषु हिमालयः .......... अस्ति। हिमालये .......... अपि प्राप्यन्ते।

**उत्तरम् :**

हिमालयः पर्वतानां राजा अस्ति। हिमालयात् गंगा प्रभवति। अस्य शिखराणि हिमाच्छादितानि सन्ति। हिमालये मुनयः तपं कुर्वन्ति। हिमालयः भारतस्य प्रहरी अस्ति। पर्वतेषु हिमालयः उच्चतमः अस्ति। हिमालये औषधयः अपि प्राप्यन्ते।

**28.** अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। 3

1. आसीद् कश्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः।
2. सा च विभव क्षयाद्देशान्तरं गन्तुमिच्छति।
3. तस्य च गृहे लोहघटिता पूर्व पुरुषोपार्जिता तुलासीत्।
4. तां च कस्यचिद् श्रेष्ठिनो गृहे निक्षेपभूत्वां कृत्वा देशान्तरं प्रस्थितः।
5. ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच– "भो श्रेष्ठिन्! दीयतां मे सा निक्षेप तुला।"
6. स आह– "भोः! नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता" इति।

**उत्तरम् :**

1. आसीद् कश्मिंश्चिद् अधिष्ठाने जीर्णधनो नाम वणिक्पुत्रः।
2. सा च विभव क्षयाद्देशान्तरं गन्तुमिच्छति।
3. तस्य च गृहे लोहघटिता पूर्व पुरुषोपार्जिता तुलासीत्।
4. तां च कस्यचिद् श्रेष्ठिनो गृहे निक्षेपभूत्वां कृत्वा देशान्तरं प्रस्थितः।
5. ततः सुचिरं कालं देशान्तरं यथेच्छया भ्रान्त्वा पुनः स्वपुरमागत्य तं श्रेष्ठिनमुवाच– "भो श्रेष्ठिन्! दीयतां मे सा निक्षेप तुला।"
6. स आह– "भोः! नास्ति सा, त्वदीया तुला मूषकैर्भक्षिता" इति।

*******

सत्र 2020–21 से नये पाठ्यक्रमानुसार सभी कक्षाओं के सभी विषयों की टेक्स्ट बुक एवं सभी प्रकार की सहायक अध्ययन सामग्री विद्यार्थियों को मोबाइल पर व्हाट्सएप द्वारा एवं वेबसाइट www.rbse.online पर उपलब्ध करवायी जाएगी। इसके लिये विद्यार्थियों से किसी भी प्रकार का कोई शुल्क नहीं लिया जाएगा। इसके लिये विद्यार्थियों को किसी भी प्रकार का कोई OTP Verification या Email द्वारा Verification नहीं देना होगा। हमारा व्हाट्सएप नम्बर जानने या अन्य किसी भी प्रकार की जानकारी के लिये वेबसाइट www.rbse.online पर विजिट करें।

सभी गुरूजनों से निवेदन है कि RBSE के सॉल्वड मॉडल पेपर प्राप्त करने के लिए 9460377092 पर सिर्फ TEACHER शब्द SMS करें (व्हाट्सएप्प ना करें) आपसे संपर्क कर आपको विशेष रुप से मॉडल पेपर भेजे जाएेंगे।